स्त्रीबालाभ्युपपत्तौ च बाह्यानां सिद्धिकारणम् । अहिंसा सत्यमस्तेयं शौचमिन्द्रियनिग्रहः । एतं सामासिकं धर्मं चातुर्वर्ण्येऽब्रवीन्मनुः । शूद्रायां ब्राह्मणाज्जातः श्रेयसा चेत् प्रजायते । अश्रेयान् श्रेयसीं जातिं गच्छत्यासप्तमाद्युगात् । शूद्रो ब्राह्मणतामेति ब्राह्मणश्चैति शूद्रताम् । क्षत्रियाज्जातमेवन्तु विद्याद्वैश्यात्तथैव च । अनार्य्यायां समुत्पन्नो ब्राह्मणात्तु यदृच्छया । ब्राह्मण्यामप्यनार्य्यात्तु श्रेयस्त्वं क्वेति चेद्भवेत् । जातो नार्य्यामनार्य्यायामार्य्यादार्य्यो भवेद्गुणैः । जातोऽप्यनार्य्यादार्य्यायामनार्य्य इति निश्चयः । तावुभावप्यसंस्कार्य्याविति धर्मो व्यवस्थितः । वैगुण्याज्जन्मनः पूर्व उत्तरः प्रतिलोमतः । सुबीजञ्चैव सुक्षेत्रे जातं सम्पद्यते यथा । तथार्य्याज्जात आर्य्यायां सर्वं संस्कारमर्हति । वीजमेके प्रशंसन्ति क्षेत्रमन्ये मनीषिणः । वीजक्षेत्रे तथैवान्ये तत्रेयन्तु व्यवस्थितिः । अक्षेत्रे वीजमुत्सृष्टमन्तरैव विनश्यति । अवीजकमपि क्षेत्रं केवलं स्थण्डिलं भवेत् । यस्माद्वीजप्रभावेण तिर्य्यग्जा ऋषयोऽभवन् । पूजिताश्च प्रशस्ताश्च तस्माद्वीजं प्रशस्यते । अनार्य्यमार्य्यकर्म्माणमार्य्यं चानार्य्यकर्म्मिणम् । सम्प्रधार्य्याब्रवीद्धाता न समौ नासमाविति ।”

जातिभेदा वृद्धहारीतेनाप्युक्ता यथा

“ब्राह्मणाः क्षत्रिया वैश्याः शूद्रा वर्णा यथाक्रमम् । आद्यास्त्रयो द्विजाः प्रोक्तास्तेषां वै मन्त्रवत्क्रियाः । सवर्णेभ्यः सवर्णासु जायन्ते हि सजातयः । तेषां सङ्करयोगाश्च प्रतिलोमानुलोमजाः । विप्रात् मूर्द्धावसिक्तस्तु क्षत्रियायामजायत । वैश्यायान्तु तथाम्बष्ठो निषादः शूद्रया तथा । राजन्याद्वैश्याशूद्र्योस्तु माहिष्योग्रौ तु तौ स्मृतौ । शूद्र्यां वैश्यात्तु करणस्त्वेवं तेऽनुलोमजाः । विप्रायां क्षत्रियात् सूतः वैश्याद्वैदेहकस्तथा । चण्डालस्तु तथा शूद्रात्सर्वकर्मसु गर्हितः । मागधः क्षत्रियायां वै वैश्यात्, क्षत्ता शूद्रतः । शूद्रादयोगवं वैश्या जनयामास वै सुतम् । रथकारः करण्यान्तु माहिष्येण प्रजायते । अससान्तरो ज्ञेयाः प्रतिलोमानुलोमजाः । प्रतिलोमास्तु वै जाता गर्हिताः सर्वकर्मसु” ।

उशनसाऽप्युक्ता यथा

“अतः परं प्रवक्ष्यामि जातिवृत्तिविधानकम् । अनुलोमविधानञ्च प्रतिलोमविधिं तथा । सान्तरालकसंयुक्तं सर्वं संक्षिप्य चोच्यते । नृपाद् ब्राह्मणकन्यायां विवाहेषु समन्वयात् । जातः सूतोऽत्र निर्दिष्टः प्रतिलोमविधिर्द्विजः । वेदानर्हस्तथा चैषां धर्माणामनुबोधकः । सूताद्विप्रप्रसूतायां सूतो वेणुक उच्यते । नृपायामेव तस्यैव जातो यश्चर्मकारकः । ब्राह्मण्यां क्षत्रियाच्चौर्य्याद्रथकारः प्रजायते । वृत्तञ्च शूद्रवत्तस्य द्विजत्वं प्रतिषिध्यते । यानानां ये च वोढ़ारस्तेषाञ्च परिचारकाः । शूद्रवृत्त्या तु जीवन्ति न क्षात्रं धर्ममाचरेत् । ब्राह्मण्यां वैश्यसंसर्गाज्जातो मागध उच्यते । वन्दित्वं ब्राह्मणानाञ्च क्षत्रियाणां विशेषतः । प्रशंसावृत्तिको जीवेद्वैश्यप्रेष्यकरस्तथा । ब्राह्मण्यां शूद्रसंसर्गाज्जातश्चाण्डाल उच्यते । सीसमाभरणं तस्य कार्ष्णायसमथापि वा । वर्ध्रीं कण्ठे समाबध्य झल्लरीं कक्षतोऽपि वा । मलापकर्षणं ग्रामे पूर्व्वाह्णे परिशुद्धिकम् । नापराह्णे प्रविष्टोऽपि बहिर्ग्रामाच्च नैर्ऋते । पिण्डीभूता भवन्त्यत्र नो चेद् बध्या विशेषतः । चाण्डालाद्वैश्यकन्यायां जातः श्वपच उच्यते । श्वमांसभक्षणं तेषां श्वान एव च तद्बलम् । नृपायां वैश्यसंसर्गादायोगव इति स्मृतः । तन्तुवाया भवन्त्येव वसुकांस्योपजीविनः । शीलिकाः केचदत्रैव जीवनं वस्त्रनिर्मिते । आयोगवेन विप्रायां जातास्ताम्रोपजीविनः । तस्यैव नृपकन्यायां जातः सूनिक उच्यते । सूनिकस्य नृपायान्तु जाता उद्बन्धकाः स्मृताः । निर्णेजयेयुर्वस्त्राणि अस्पृश्याश्च भवन्त्यतः । नृपायां वैश्यतश्चौर्य्यात् पुलिन्दः परिकीर्त्तितः । पशुवृत्तिर्भवेत्तस्य हन्युस्तान् दुष्टसत्त्वकान् । नृपायां शूद्रसंसर्गाज्जातः पुक्कश उच्यते । सुरावृत्तिं समारुह्य मधुविक्रयकर्मणा । कृतकानां सुराणाञ्च विक्रेता याचको भवेत् । पुक्कशाद्वैश्यकन्यायां जातो रजक उच्यते । नृपायां शूद्रतश्चौर्य्याज्जातो रञ्जक उच्यते । वैश्यायां रञ्जकाज्जातो नर्त्तको गायको भवेत् । वैश्यायां शूद्रसंसर्गाज्जातो वैदेहकः स्मृतः । अजानां पालनं कुर्य्यान्महिषीणां गवामपि । दधिक्षीराज्यतक्राणां विक्रयाज्जीवनं भवेत् । वैदेहकात्तु विप्रायां जाताश्चर्म्मोपजीविनः । नृपायामेव तस्यैव सूचिकः पाचकः स्मृतः । वैश्यायां शूद्रतश्चौर्य्याज्जातश्चक्री स उच्यते । तैलपिष्टकजीवी तु लवणं भावयन् पुनः । विधिना ब्राह्मणः प्राप्य नृपायान्तु समन्त्रकम् । जातः सुवर्ण इत्युक्तः सानुलोमद्विजः स्मृतः । अथ वर्णक्रियां कुर्व-